म्यहम् । ब्रह्मचारी गुरुर्य्यश्चात्तपस्वी ब्राह्मणश्च सन् । अकार्षीत्समयञ्च शमावाभ्यां यः कृतो मिथः । शप्स्ये तस्मात् संक्रुद्धो भवन्तं तं निबोध मे । सुकुमारी च ते भार्य्या भविष्यति न संशयः । वानरञ्चैव ते रूपं विवाहात्प्रभृति प्रभो ! । संद्रक्ष्यन्ति नरास्त्वान्ये स्वरूपेण विनाननम् । स तद्वाक्यन्तु विज्ञाय नारदः पर्व्वतं तथा । अशपत्तमपि क्रोधाद्भागिनेयं स मातुलः । तपसा ब्रह्मचर्य्येण सत्येन च दमेन च । युक्तोऽपि नित्यधर्म्मस्त्व न वै स्वर्गमवाप्स्यसि । तौ तु शप्त्वा भृशं क्रुद्धौ परस्परममर्षणौ । प्रतिजग्मतुरन्योन्यं क्रुद्धाविव गजोत्तमौ । पर्व्वतः पृथिवीं कृत्स्नां विचचार महामतिः । पूज्यमानो यथान्यायं तेजसा स्वेन भारत ! । अथ तामलभत्कन्यां नारदः सृञ्जयात्मजाम् । धर्म्मेण विप्रप्रवरः सुकुमारीमनिन्दिताम् । सा तु कन्या यथाशापं नारदं तं ददर्श ह । पाणिग्रहणमन्त्राणां नियोगादेव नारदम् । सुकुमारी च देवर्षिं वानरप्रतिमाननम् । नैवावमन्यत तदा प्रीतिमत्येव चाभवत् । उपतस्थे च भर्त्तारं न चान्यं मनसाऽप्यगात् । देवं मुनिं वा यक्षं वा पतित्वे पतिवत्सला । ततः कदाचिद्भगवान्पर्व्वतोऽनुचचार ह । वनं विरहितं किञ्चित्तत्रापश्यत्स नारदम् । ततोऽभिवाद्य प्रोवाच नारदं पर्वतस्तदा । भवान् प्रसादं कुरुतात् स्वर्गादेशाय मे प्रभो ! । तमुवाच ततो दृष्ट्वा पर्वतं नारदस्तथा । कृताञ्जलिमुपासीनं दीनं दीनतरः स्वयम् । त्वयाऽहं प्रथमं शप्तो वानरस्त्वं भविष्यसि । इत्युक्तेन मया पश्चाच्छप्तस्त्वमपि मत्सरात् । अद्यप्रभृति वै वासं स्वर्गे नावाप्स्यसीति ह । तव नैतद्धि सदृशं पुत्रस्थाने हि मे भवान् । निवर्त्तयेतां तौ शापावन्योन्येन तदा मुनी । श्रीसमृद्धं तदा दृष्ट्वा नारदं देवरूपिणम् । सुकुमारी प्रदुद्राव परपत्यभिशङ्कया । तां पर्व्वतस्ततो दृष्ट्वा प्रद्रवन्तीमनिन्दिताम् । अब्रवीत्तव भर्त्तैष नात्र कार्य्या विचारणा । ऋषिः परमधर्म्मात्मा नारदो भगवत्प्रभुः । तवैवाभेद्यहृदयो मा तेऽभूदत्र संशयः । साऽनुनीता बहुविधं पर्व्वतेन महात्मना । शापदोषञ्च तं भर्त्तुः श्रुत्वा प्रकृतिमागता । पर्व्वतोऽथ ययौ स्वर्गम् नारदोऽभ्यगमद्गृहान्”। कपिमुखकौशास्यादयोऽप्यत्र । ईत०वानरमुखे न० ।

**कपिवदान्य** पु० कपिषु वदान्यो बहुफलत्वेन तत्प्रदानात् । आम्रातकवृक्षे । शब्दच० । [अमरः ।

**कपिवल्ली** स्त्री कपिरिव तल्लोमतुल्या वल्ली । गजपिप्पल्याम्

**कपिश** पु० कपिः कपिनामास्त्यस्य लोमा० श । १सिह्लके (शिलारस) मेदि० कपिं कपिवर्णं श्यति शो–क । २कृष्णपीतमिश्रितवर्णे पु० ३तद्युक्ते त्रि० अम० । “मधुकरविटपानमिता तरुपङ्क्तीर्बिभ्रतोऽस्य विटपानमिताः । विपाकपिशङ्गलता–रजसा रोधश्चकासि कपिशं गलता” माघः । अत्र तरुपङ्क्तेः कृष्णत्वात् पिशङ्गलतारजोयोगात् श्यावत्वम् । ४रक्तकृष्णमिश्रवर्णे पु० ५तद्वति त्रि० “सन्ध्याभ्रकपिशस्तस्य विराधोनाम राक्षसः” रघुः । “ईषद्बद्धरजःकणाग्रकपिशा चूते नवा मञ्जरी” विक्र० । “नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढैः” मेघ० । तत्तुल्यवर्णत्वात् ६मद्यभेदे न० हला० । “शामानपश्यत् कपिशं पिपासतः” माघः ७माधवीलतायां मेदि० स्त्री । ८उत्कलदेशसमीपस्थे नदीभेदे । “स तीर्त्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः । उत्कलादर्शितपथः कलिङ्गाभिमुखं ययौ” रघुः ।

**कपिशाञ्जन** पु० कपिशमञ्जनं यत्र । शिवे त्रिका० तस्य श्वेतत्वेनाञ्जनस्य कृष्णत्वात्तयोर्मिश्रणात् तथात्वम् ।

**कपिशापुत्र** पु० कपिशायाः पुत्रः । पिशाचे शब्दरत्ना० ।

**कपिशी** स्त्री कपिश+वर्णवाचित्वात् ङीष् । १माधव्यां २सुरायाञ्च शब्दकल्पद्रुमे मेदिनिजटाधरवाक्यं प्रमाणत्वेनोक्तम् । तच्चिन्त्यं “कपिशस्त्रिषु श्यावे स्त्री माधव्यां सिह्लके पुमान्” इति मेदिन्यां स्त्रीमात्रोक्तेः ङीषन्ततानुक्तेश्च । “वर्णात्तोपधादनुदात्तात् तोनः” “अन्यतो ङीष्” पा० सूत्रयोः तोपधभिन्नवर्णवाचिनोऽनुदात्तान्तप्रतिपादकात् स्त्रियां ङीष् स्यात् सि० कौ० व्याख्यानात् कपिशशब्दस्यानुदात्तत्वाभावेन ङीषोऽप्रसक्तेः “लघावन्ते द्वयोश्च बह्वषो गुरुः” फिट्सूत्रेण तस्य पिशङ्गकल्माषयोरिव गुरुयुक्तत्वाभावेन अनुदात्तत्वाभावात् अतएव “ईषद्बद्धरजःकणाग्रकपिशा चूते नवा मञ्जरीति” विक्रमोर्वश्यां टावन्ततया प्रयोगः । तथा च स्त्रीत्वेऽपि कपिशा इत्येवंरूपेण भवितव्यं न ङीषन्तेनेति द्रष्टव्यम् । किञ्च उक्तमेदिनिवाक्ये तस्य सुरार्थताऽपि न दृश्यते प्रत्युत “कश्यं मद्यञ्च मैरेयं कपिशं कापिशायनम्” हलायुधोक्तेः मद्ये क्लीवत्वमेव । अतएव “शाम्यानपश्यत् कपिशं पिपासतः” इति माघे क्लीवतयैव प्रयुक्तम् ।

**कपिशीका** स्त्री कपिशैव स्वार्थे वा० ईक । मदिरिकायां त्रिका०

**कपिशीर्ष** न० कपीनां प्रियं शीर्षमस्य शाक० । प्राकाराग्रे त्रिका० । कपीनां प्राकाराग्रवासित्वं हि लोकसिद्धम् ।